प्रणवं कुर्यादादावन्ते च सर्वदा। स्रवत्यनोङ्कृतं पूर्वं परस्ताच् च विशीर्यति" भन्ने (२।७४) र "ओङ्कारपूर्विकास् तिस्रो महाव्याहृतयोऽव्ययाः। त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम्" (२।८१) भन्ने उल्लेख पाइन्छ। स्कन्दपुराणका काशीखण्डमा पनि "वेदारम्भे विसर्गे च विदध्यात् प्रणवं सदा। अफलोऽनोङ्कृतो यस्मात् पठितोऽपि न सिद्धये" (३६।४२) भन्ने उल्लेख छ। बृहद्योगियाज्ञवल्क्यस्मृतिमा पनि ओङ्कारको महिमा धेरै वर्णित छ। जस्तै– "ब्रह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा। स्रवत्यनोङ्कृतं पूर्वं परस्ताच् च विशीर्यते। प्रोक्षणे *पोषणे* चैव प्रतिष्ठाने प्रतिग्रहे। आश्रावणे वषट्कारे प्रत्याश्रावे जपेऽपि च॥ सामसु ब्रह्ममुख्येषु ऋग्यजुस्तोत्रशस्त्रयोः। सर्वमन्त्रप्रयोगेषु ओमित्यादौ प्रयुज्यते। तेन सम्परिपूर्णानि यथोक्तानि भवन्ति च। सर्वमन्त्राधिराजेन ओङ्कारेण न संशयः॥ यदूनं चातिरिक्तं च यच् छिद्रं यदयाज्ञिकम्। यदमेध्यमशुद्धं वा यातयामं च यद् भवेत्॥ ओङ्कारेण प्रयुक्तेन सर्वं चाऽविकलं भवेत्। अनूनं नाऽतिरिक्तं च अच्छिद्रं याज्ञिकं तथा" (२।१४८-१५४)। मनुस्मृत्यादिका वचनबाट वेदका आरम्भमा ओङ्कार अनि महाव्याहृतिहरु र सावित्र-गायत्री प्रयुक्त हुने कुरा देखिञ्छ र अर्वाचीन ब्रह्मयज्ञपद्धतिकार हरिहरादिले तेस्तै प्रयोग देखाएका पनि छन्। तथापि माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिहरुले ब्रह्मयज्ञमा वेदमन्त्रादिका आरम्भमा पारस्करगृह्यसूत्रको (२।१०।१८) र बृहद्योगियाज्ञवल्क्यस्मृतिको (४।३८) अनुकूल रूपमा ओङ्कारको उच्चारण गरि सावित्रगायत्रीको तिनपल्ट उच्चारण गरेर वेदमन्त्रादिको अध्ययनको प्रारम्भ गर्नु समुचित देखिञ्छ। ओङ्कारभन्दा अगि "हरिः" भन्ने उच्चारण गर्ने कुरा भने माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाका प्रामाणिक ग्रन्थमा कतै पनि नदेखिएकाले सो कुरा आवश्यक देखिँदैन। एस विषयको विशेष विवेचना कौण्डिन्यायनशिक्षामा (पृ.१३२-१३३) गरिएको छ। आधुनिक समयमा देखिएको प्रचलन अज्ञानमूलक वा गतानुगतिकतामूलक देखिञ्छ। वेदभिन्न श्रौतसूत्रादिग्रन्थका अध्ययनमा भने प्रारम्भमा ओङ्कारको र सावित्र गायत्रीको प्रयोग आवश्यक देखिँदैन। तिनको प्रयोग गरेमा सावित्र गायत्रीका अन्त्यमा ओङ्कारको उच्चारण गरेर मात्र वेदभिन्न श्रौतसूत्रादिग्रन्थको उच्चारण गर्नु समुचित हुञ्छ। वेदभागलाइ र लौकिकग्रन्थ-भागलाइ ओङ्कारले नछुट्याइ मिसाउनु उचित हुँदैन।

pal Sanskrit University, Balmeeki Campus, Kathmar

Public Domain. Digitization by eGangotri.Fundi

स्वाध्याय

उक्त ब्रह्मयज्ञविधायक कात्यायनवचनमा "स्वाद्ध्यायञ् च यथा-शक्त्यादावारब्ध्य वेदम्" भन्ने उल्लेख छ। स्वाध्याय भन्नाले मुख्य रूपमा स्व-शाखाको अर्थात् आँफ्ना शाखाको वेद भन्ने बुजिञ्छ। तथापि उक्त वचनमा "आदौ आरब्ध्य वेदम्" (पैला वेद आरम्भगरेर) भनिएकाले उक्त वचनमा स्वाध्याय भन्नाले स्वशाखाका तथा आँफुले गुरुमुख गरेर पडेका सम्बद्ध अन्य वेदशाखाका मन्त्रसंहिता-ब्राह्मणग्रन्थका साथै स्वशाखाका श्रौतसूत्र-गृह्यसूत्र-श्रौतगृह्यपरिशिष्ट-हरु, स्वशाखाको प्रातिशाख्यशिक्षाग्रन्थ, व्याकरण, निरुक्त, छन्दशास्त्र, ज्योतिष, धर्ममीमांसाशास्त्र र ब्रह्ममीमांसाशास्त्र पनि लक्षणाश्रयणले सङ्गृहीत भएको कुरा बुजिञ्छ। अर्वाचीन ब्रह्मयज्ञपद्धतिकारहरुले याज्ञवल्क्यस्मृतिको "वेदाथर्व-पुराणानि सेतिहासानि शक्तितः। जपयज्ञप्रसिद्धयर्थं विद्यां चाध्यात्मिकीं जपेत्" (१।१०१) भन्ने वचनको र मनुस्मृतिको "बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च। नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान्" (४।१९) भन्ने वचनको तथा वेदव्यासस्मृतिको "एवं द्विजातिमापन्नो विमुक्तो बाल्यदोषतः। श्रुति-स्मृति-पुराणानां भवेदध्ययनक्षमः" (१।२३), "मन्त्रैः प्राणांस्त्रिरायम्य सौरैश्चार्कं विलोक-येत्। तिष्ठन् स्थित्वा तु गायत्रीं ततः स्वाध्यायमाचरेत्॥ ऋचां च यजुषां साम्ना-मथर्वाङ्गिरसामपि। इतिहासपुराणानां वेदोपनिषदां द्विजः। शक्त्या सम्यक् पठेन् नित्यमल्पमप्या समापनात्। स यज्ञदानतपसामखिलं फलमाप्नुयात्। वेदेभ्योऽन्यत्र सन्तुष्टः स विप्रः शूद्रतामियात्। तस्मादहरहर् वेदं द्विजोऽधीयीत वाग्यतः। धर्म-शास्त्रेतिहासादिसर्वेषां शक्तितः पठेत्" (३।९-१३) भन्ने वचनको समेत विचारले होला नित्यस्वाध्यायाध्ययनमा पड्न पर्ने ग्रन्थहरुका प्रतीकमा आदित्यब्रह्म-सम्प्रदायका शुक्लजुर्वेदिहरुका ब्रह्मयज्ञमा पनि अथर्ववेदको प्रतीक वा मन्त्र दिँदा सम्प्रदायविशेषका अज्ञानले गर्दा "शन्नो देवीः" इत्यादि उल्लेख तिनिहरुले गरेका छन्। एसबाट तिनिहरुको विवेकशिथिलता देखिञ्छ। तिनिहरुले ति प्रतीकहरुमा "योगीश्वरं याज्ञवल्क्यम्", "नारायणं नमस्कृत्य" इत्यादि अनुस्मृतिको र महाभारत-को प्रतीक पनि दिएको देखिञ्छ। किन्तु कतिपय अतिविशिष्ट श्रुतिधर द्विज-वरहरुले ब्रह्मयज्ञमा चारै वेद, छअै वेदाङ्ग, मनुस्मृति-याज्ञवल्क्यस्मृत्यादि अनु-स्मृतिहरु, अग्निपुराणादि महापुराणहरु, रामायण, महाभारत इत्यादि इतिहासग्रन्थ-

Sanskrit University, Balmeeki Campus, Kathm

In Public Domain. Digitization by eGangotri.Funding

हरु सबै नै पड्न सके पनि साधारण द्विजवरहरुलाइ उक्त ग्रन्थहरु सबै पड्नु असम्भव देखिएकाले ब्रह्मयज्ञमा यथाशक्ति चार वा तिन वा दुइ वा एक वेद, छ अङ्ग, धर्ममीमांसा, ब्रह्ममीमांसा एति ग्रन्थ पड्नु मुख्य पक्ष देखिञ्छ। यो पक्ष प्रमुख भएको कुरा लौगाक्षिस्मृतिका उल्लेखबाट (स्मृतिसन्दर्भ, षष्ठभाग, २०१३, पृ.२७५-२७६; २९९), शिवपुराणकैलाससंहिताका उल्लेखबाट (१२।८८-९२) र देवीभागवतका उल्लेखबाट(११।२०।३-१०) पनि बुजिञ्छ। अशक्तिले गर्दा आँफ्ना शाखाको वेद (मन्त्र-ब्राह्मण) र कल्पसूत्र (श्रौतसूत्र-गृह्यसूत्र-श्रौतगृह्यपरिशिष्ट) मात्र पड्नु पनि शास्त्रयुक्तिसङ्गतै देखिञ्छ। हरिहरले ब्रह्मयज्ञमा मुख्य रूपमा मन्त्र-ब्राह्मणात्मक वेदको नै अध्ययन गर्न पर्ने कुरा देखाएका छन्। तथापि पारस्करगृह्यसूत्रका विधानमा छ वेदाङ्गमध्ये अरु पड्न नसके पनि कल्पसूत्र नपडिकन त कसैको पनि स्नान (समावर्तन) नै हुन नसक्ने देखिएकाले र कल्पसूत्रहरुमा मन्त्रब्राह्मणहरुमा नआएका मन्त्रहरुसमेत आएकाले ब्रह्मयज्ञमा मन्त्रब्राह्मणात्मक वेदपछि कल्पसूत्रहरुलाइ नै प्राथमिकता दिएर अध्ययन गर्नपर्ने देखिञ्छ। यो कुरा लौगाक्षिस्मृतिका (पृ.२७५, २९९) उल्लेखबाट र आपस्तम्बधर्मसूत्रमा छ वेदाङ्गहरुमध्ये कल्पसूत्रको (छन्दःकल्पको) प्रथम स्थानमा उल्लेख गरिएको कुराबाट (२।४।१।१०,११) पनि बुजिञ्छ। कल्पसूत्र गुरुमुख गरि नपडेका व्यक्तिको त पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरणादि संस्कार गर्ने-गराउने सम्म शास्त्रीय अधिकार पनि वास्तवमा हुँदैन। तसर्थ मुख्य रूपमा ब्रह्मयज्ञमा स्वशाखाका मन्त्र-ब्राह्मण-कल्पसूत्रग्रन्थहरु त न्यूनतम रूपमा पनि पड्नै पर्ने देखिञ्छ। इ ग्रन्थ पड्दा मन्त्रसंहिताबाट प्रारम्भ गरेर अध्याय वा अनुवाक वा ब्राह्मण वा कण्डिका जेजति सकिञ्छ तेति पडेर विराम गरि भोलिपल्ट अगिल्ला दिन जाँहाँ विराम गरिएको छ त्याँहाँबाट थाल्ने गरेर क्रमैले मन्त्रसंहिता सकि ब्राह्मणग्रन्थ थाल्ने, त्यो सकि श्रौतगृह्य-कल्पसूत्रादि थाल्ने ति सकेर पुनः मन्त्रसंहिता थाल्ने गरेर नित्य अध्ययन गर्नपर्छ। ब्रह्मयज्ञमा अनध्याय हुँदैन भन्ने कुरा **"वेदोपकरणे चैव स्वाध्याये चैव नैत्यके। नाऽनुरोधोऽस्त्यनध्याये होममन्त्रेषु चैव हि"** (मनु.२।१०५) भन्ने वचनबाट पनि बुजिञ्छ।

अनिराकरणमन्त्र

यद्यपि प्राचीन-अर्वाचीन अन्य ब्रह्मयज्ञपद्धतिकारले ब्रह्मयज्ञका अन्त्यमा **"इति विद्यातपोयोनिः"** इत्यादि महाभारतको (शान्तिपर्व ४७।९८) श्लोकको प्रयोग

pal Sanskrit University, Balmeeki Campus, Kathmar

Public Domain. Digitization by eGangotri.Fundi

गर्ने कुरा देखाएका छन्, बालभट्टले ऋग्वेदाध्यायिहरुको अनुकरण गरेर होला "ओ३म् नमो ब्रह्मणे नमोऽस्त्वग्नये" इत्यादि परिधानीय ऋचाहरुको प्रयोग पनि देखाएका छन्, तथापि पारस्करगृह्यसूत्रमा "अथातोऽधीत्याऽधीत्त्याऽनिराकरणम् प्रतीकम् मे विचक्षणम्" (३।१५।२३) इत्यादि विधान भएको हुनाले प्रत्येक दिनमा ब्रह्मयज्ञमा जेजति मन्त्रभाग वा ब्राह्मणभाग वा श्रौतसूत्रादिकल्पसूत्रादिभाग पडिञ्छ तेसका अन्त्यमा माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिहरुले ऋग्वेदीय परिधानीय मन्त्र वा "इति विद्यातपोयोनिः" इत्यादि महाभारतको (१२।४७।९८) श्लोक पढ्ने हैन, स्वशाखागृह्यसूत्ररूप पारस्करगृह्यसूत्रका (३।१५।२३) विधानअनुसार "प्रतीकम् मे विचक्षणम्" इत्यादि अनिराकरणमन्त्र नै पढ्ने हो भन्ने बुजिञ्छ। तसर्थ एस विषयमा पनि स्वशाखासूत्रको नै अनुसरण गर्नपर्छ। पारस्करगृह्यसूत्रका उक्त विधानमा "अधीत्त्याऽधीत्त्य" भनि वीप्सा बुजाइएकाले सबै अध्ययनका अन्त्यमा उक्त अनिराकरणमन्त्रको पाठ हुने कुरा स्पष्ट छ। यो कुरा जयराम-हरिहर-विश्वनाथहरुका पारस्करगृह्यसूत्रव्याख्याहरुबाट पनि बुजिञ्छ। उक्त निगदमन्त्रको अर्थप्रकाशनशक्तिका विचारबाट पनि यो कुरा समर्थित हुञ्छ। तसर्थ माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिहरुले ब्रह्मयज्ञमा पडिने मन्त्रसंहितादिका तेसतेस दिनका अध्ययनका विरामम ओङ्कारको उच्चारण गरि "प्रतीकम् मे विचक्षणम्" इत्यादि पारस्करोक्त अनिराकरणमन्त्रको नै पाठ गर्नपर्छ, अर्थोकको पाठ गर्न उचित हुँदैन।

ब्रह्मयज्ञाङ्ग तर्पण

ब्रह्मयज्ञका अन्त्यमा अनिराकरणमन्त्र पडेपछि कात्यायन-त्रिकण्डिक-स्नानसूत्रमा बताएका प्रकारले ब्रह्मयज्ञाङ्ग तर्पण गर्नपर्छ। चल्तिका तर्पणपद्धतिमा रहेका स्वशाखासूत्रप्रतिकूलताका विषयमा प्रस्तुत ग्रन्थकारका एकोद्दिष्टश्राद्ध-पद्धतिका (२०५८) भूमिकामा लेखिसकिएको छ। याँहाँ तर्पणपद्धति पूर्णतया कात्यायन-स्नानसूत्रका तृतीयकण्डिकाको अनुकूल रूपमा दिइएको छ। पिता भएपनि ब्रह्मयज्ञ गर्ने व्यक्तिले (स्वपितृतर्पणबाहेक) यमतर्पणसम्मको तर्पण र ब्रह्माद्यर्चनादि गर्न हुञ्छ, गर्नपर्छ। यो कुरा कात्यायन-त्रिकण्डिक-स्नानसूत्रमा "जीवत्तत्पितृकोऽप्येतानन्याँश्चेतरः" भनि खुलाएरै भनिएको छ।

Sanskrit University, Balmeeki Campus, Kathm

In Public Domain. Digitization by eGangotri.Funding

प्रस्तुत ब्रह्मयज्ञपद्धतिको प्रकाशनको आवश्यकता

वैदिक-सनातन-वर्णाश्रमधर्मानुयायिहरुको धर्मको मूल वेद भएको र वेदादिशास्त्रको नित्य अध्ययन नै ब्रह्मयज्ञ भएको हुनाले ब्रह्मयज्ञ नै वैदिक-सनातन-वर्णाश्रमधर्मको मूल हो। ब्रह्मयज्ञबाट नै धर्ममा प्रमाण हुने मूल ग्रन्थहरुको ज्ञान हुने र ब्रह्मयज्ञ नभए धर्ममा नै भ्रम हुन जाने हुनाले नै आफुले पनि प्रमुख रूपमा धर्ममोक्षको साधना गर्न पर्ने र लोकलाइ पनि धर्ममोक्षमार्गको उपदेश पनि गर्न पर्ने ब्राह्मणका लागि अरु धर्मकर्म गर्न नसके पनि ब्रह्मयज्ञ त गर्नै पर्ने र ब्राह्मण ब्रह्मयज्ञले मात्र पनि कृतार्थ हुने पनि मानिएको हो। ब्रह्मयज्ञ वैदिक ज्ञानको ज्योति जगाइ राख्ने कर्म हो, वैदिक ज्ञानको ज्योतिमा निरन्तर ध्यान आकृष्ट गर्ने अति महत्त्वपूर्ण कर्म हो। ब्रह्मयज्ञ एस्तो महत्त्वपूर्ण र स्नान-सन्ध्योपासनजस्तै गरि नित्यै गर्न पर्ने कर्म भए पनि आँफ्ना सन्ततिलाइ आचार-विचार केइ सिकाउनेहरुले नै पनि र वेदविद्याश्रमको पाठ्यक्रम बनाउने पाठ्यपुस्तक लेख्ने तथा वेदविद्याश्रम चलाउनेहरुले पनि ब्रह्मयज्ञमा ध्यान नदिएको देखिएको छ। एसरि वैदिक धर्मको मूल नै सुक्न हराउन लागेको देखिएकाले ब्रह्मयज्ञका विषयमा ब्राह्मणसमाजमा समुचित चेतना नभएको जस्तो देखिएको छ। उपलब्ध अरु ब्रह्मयज्ञपद्धतिहरुबाट ब्रह्मयज्ञको वास्तविक स्वरूप र महत्त्व तेति स्पष्ट हुन नसकेको पनि देखिएको छ। तसर्थ वैदिक शास्त्रधर्म-चेतना जगाउन केइ विस्तृतै भूमिकाका साथमा यो ब्रह्मयज्ञपद्धति प्रकाशनमा ल्याउन प्रयास गरिएको हो। अरुथोक गर्न नसक्ने आस्तिक ब्राह्मण स्नान-सन्ध्योपासनपूर्वक गरिने नित्य ब्रह्मयज्ञ र ब्रह्मयज्ञाङ्ग देवादि-दिव्यमनुष्य-दिव्यपितृ-(यम)-(स्वपितृ)-तर्पण-ब्रह्माद्यर्चनादिले मात्र पनि कृतार्थ हुने हुनाले एस प्रकारको ब्रह्मयज्ञपद्धति प्रस्तुत गरिएको हो।

आस्तिक सज्जन विद्वान्हरुबाट कृपाको आशा

वेदवादि शास्त्रवादि वैदिक-सनातन-वर्णाश्रमधर्मवादि सत्यनिष्ठ न्याय-परायण धर्मकाम आस्तिक सज्जन विद्वान्हरुबाट भूमिकासहित एस ब्रह्मयज्ञ-पद्धतिको अवलोकन गर्ने र एसमा केइ त्रुटि देखिए लेखबद्धरूपमा शास्त्रवचन र युक्ति देखाइ एसमा संशोधन गर्न पर्ने कुरा देखाइदिने कृपा हुनेछ र एस पद्धतिको

pal Sanskrit University, Balmeeki Campus, Kathmar

Public Domain. Digitization by eGangotri.Fund

उपादेयता देखिए तेस कुराको लोकलाइ यथावसर ज्ञान दिइ आँफुले पनि एस पद्धतिलाइ अँगालि एस प्रकारका हाम्रा वैदिक-सनातन-वर्णाश्रमधर्म-प्रचारका कार्यमा सहायता पुऱ्याउने कृपा पनि हुनेछ भन्ने आशा राखिएको छ।

भारतवर्षमा मुसलबानहरुको दबदबा बडेपछि १००० वर्षजति एतादेखि भारतवर्षका उत्तरभागमा बस्ने माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखा-ध्यायिहरुका वैदिक नित्यसदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादिका पद्धतिमा छाएको भ्रमको कुइरोलाइ श्रुति-स्मृति-पुराणका विशेष अध्ययनका बलले पञ्छाउँदै यो ब्रह्मयज्ञपद्धति प्रस्तुत गरिएको कुरामा पनि विशेष ध्यान दिन वैदिक परम्पराका आस्तिक सज्जन विद्वान्हरुमा विशेष प्रार्थना छ।

"आगमप्रवणश् चाऽहं नाऽपवाद्यः स्खलन्नपि।
न हि सद्वर्त्मना गच्छन् स्खलितेष्वप्यपोद्यते॥"

तिष्ययुगाब्द ५०६७, नभश्शुक्लप्रतिपत्,
वैक्रमाब्द २०५९, सौर-निरयण-वृषमास २८ गते,
(२०५९।२।२८ वै.),
स्वाद्ध्यायशाला।

वेदवेदाङ्गोपाङ्गस्मृतिपुराणादिशास्त्रवशर्व्वदः
शिवराज आचार्यः कौण्डिन्न्यायनः

Sanskrit University, Balmeeki Campus, Kathm

In Public Domain. Digitization by eGangotri.Funding

अथ माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायिनां द्विजानां
कात्यायन-त्रिकण्डिक-स्नानसूत्राद्यनुसारिणी

ब्रह्मयज्ञपद्धतिः

यथाशक्ति यथाकालं दशविधेषु स्नानेषु यथाशास्त्रं किमपि मध्याह्नस्नानं मध्याह्नसन्ध्योपासनं च कृत्वा प्रागग्रदर्भमये प्रागग्रदर्भोत्तरे वाऽपि शुद्धे आसने प्राङ्मुखः दर्भपाणिरुपविशेत्। {तत आचमनं कुर्यात्। तद् यथा—

दक्षिणहस्तचुलुके अप आदाय मन्त्रज्ञश्चेत् "ओ३म्। आ मा गन् न्यशसा सꣳसृज बर्च्चसा। तम् मा कुरु प्रियम् प्रजानामधिपतिम् पशूनामरिष्टिन् तनूनाम्" इति मन्त्रेण ब्राह्मतीर्थेनाऽऽचम्य पुनर् द्विस् तूष्णीमेवाऽऽचम्य "ओ३म्, बाङ्ङ् मऽआस्स्ये अस्तु" इति मन्त्रेण मुखं सम्मृशेत्, "ओ३म्, नसोर् म्मे प्राणः अस्तु" इति मन्त्रेण नासिके सम्मृशेत्, "ओ३म्, अक्ष्णोर् म्मे चक्षुः अस्तु" इति मन्त्रेण चक्षुषी सम्मृशेत्, "ओ३म्, कर्ण्णयोर् म्मे श्श्रोत्रम् अस्तु" इति मन्त्रेण दक्षिणवामक्रमेंण श्रोत्रे सम्मृशेत्, "ओ३म्, बाह्व्योर् म्मे बलम् अस्तु" इति मन्त्रेण दक्षिणकराग्रेण दक्षिणवामक्रमेण बाहू सम्मृशेत्, "ओ३म्, ऊर्ब्बोर् मऽओजः अस्तु" इति मन्त्रेण दक्षिणवामक्रमेण ऊरू सम्मृशेत्, "ओ३म्, अरिष्टानि मेऽङ्गानि सन्तु" इति मन्त्रेण दक्षिणकराग्रेण हृदयदेशं सम्मृशेत्, "ओ३म्, तनूस् त्तन्वा मे सह अस्तु" इति मन्त्रेण शिरः सम्मृशेत्।

ततः पुनः पूर्ववदाचम्य मुखादिकं पूर्ववत् सम्मृशेत्।

pal Sanskrit University, Balmeeki Campus, Kathmar

Public Domain. Digitization by eGangotri.Fund

उक्तमन्त्राऽज्ञश्चेत् "ओ३म्" इति मन्त्रेणाऽथवा तूष्णीमेवा-ऽऽचम्य "ओ३म्" इति मन्त्रेणाऽथवा तूष्णीमेव मुखादिकं सम्मृशेत्।}

(मध्याह्नसन्ध्योपासनसमनन्तरमेव ब्रह्मयज्ञस्य करणे तु एतदाचमनं पूर्वं कृतेनाऽऽचमनेनैव गतार्थमिति न वा कुर्यात्।)

ततो दक्षिणहस्ते उदकमादाय सङ्कल्पं कुर्यात्। तद् यथा- "ओ३म्, तत् सत् स्वस्ति। *{एतस्मिन् ब्रह्माण्डे भूर्लोके भूमण्डले भारतवर्षे कर्मभूमौ कुमारिकाखण्डे आर्यावर्तान्तर्गते हिमवत्खण्डे गण्डकीप्रदेशे .....निकटे .....ग्रामे (नगरे)}* इह पुण्यभूमौ *{एतस्य वर्तमानस्य ब्रह्मणो द्वितीये परार्धे प्रथमे वर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे श्वेतवाराह-कल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितम्यां चतुर्युग्यां कलौ युगे तस्य पञ्चसु सहस्रेषु षट्षष्टौ च वर्षेषु व्यतीतेषु तदुत्तरे वर्षे प्रवृत्ते}* वैदिके षष्ठे आहिर्बुध्ने युगे चान्द्र-विजयापरनामके परिवत्सराख्ये वैदिकसंवत्सरे दक्षिणायने वर्षासु ऋतौ नभसि मासे शुक्ले पक्षे प्रतिपदि तिथौ अद्य माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायी .....शर्मा .....गोत्रः ..... प्रवरोऽहं नित्यब्रह्मयज्ञे इषेत्त्वोर्ज्जे त्त्वा, व्रतमुपैष्ष्यन्; अग्निमीडे पुरोहितम्, अग्न आयाहि वीतये, ये त्रिषप्ताः परियन्ति, अथातोऽधिकारः, अथातो गृह्य्यस्थालीपाकानाङ् कर्म्म; स्वरसँस्स्कारयोश् च्छन्दसि नियमः, वृद्धिरादैच्, गौः ग्मा ज्मा क्ष्मा (समाम्नायः समाम्नातः), (मयरसतजभनलगसम्मितम्) धी श्री स्त्रीम्, पञ्चसंवत्सरमयं युगाध्यक्षम्, अथातो धर्मजिज्ञासा, अथातो ब्रह्मजि-ज्ञासा इत्यादिकेषु वेदमन्त्रसंहिता-ब्राह्मण-श्रौतसूत्र-गृह्यसूत्रश्रौतगृह्य-परिशिष्टरूपकल्प-प्रातिशाख्यशिक्षा-व्याकरण-निरुक्त-च्छन्दश्शास्त्र-ज्योतिष-धर्ममीमांसाशास्त्र-ब्रह्ममीमांसाशास्त्रग्रन्थेषु क्रमेणाध्ययनीयेषु यथाध्ययनं यथाशक्ति स्वशाखावेदमन्त्रसंहितादिग्रन्थानां क्रमेणा-

Sanskrit University, Balmeeki Campus, Kathm

In Public Domain. Digitization by eGangotri.Funding

ध्ययनेन देवपितृ-तृप्तये (अक्षय्यनाकलोकप्राप्तये) परमात्मप्रसाद-सिद्धये च छन्दःपुरुषन्यासपूर्वकं ब्रह्मयज्ञं ब्रह्मयज्ञसमङ्गतासिद्धये देवादितर्पणादिकं च करिष्ये" इत्युच्चार्य जलं भूमौ मुञ्चेत्।

ततः सर्वानुक्रमणिकोक्तं न्यासं कुर्यात्। तद् यथा—"ओ३म्, ब्रह्म्मयज्ज्ँञारम्भे छन्दःपुरुषमेनोनिर्ण्णोदनꣳ शरीरे न्यस्यामि" इत्युच्चार्य दक्षिणहस्ताग्रेण स्वं शिरः स्पृष्ट्वा "ओ३म्, तिर्य्यग्ग्बिल-श्च्चमसऽऊर्द्ध्वबुद्ध्न्ँः" इति जपेत्। ततः स्वे अक्षिणी स्पृष्ट्वा "ओ३म्, तस्स्याऽक्षिणी गोतमभरद्वाजौ" इति जपेत्। ततः स्वे श्रोत्रे स्पृष्ट्वा "ओ३म्, श्रोत्रे बिश्वामित्रजमदग्ग्ँनी" इति जपेत्। ततः स्वे नासिके स्पृष्ट्वा "ओ३म्, नासिके बसिष्ठकश्श्यपौ" इति जपेत्। ततः स्वं मुखं स्पृष्ट्वा "ओ३म्, बागत्रिः" इति जपेत्। ततः पुनः स्वं शिरः स्पृष्ट्वा "ओ३म्, गायत्रीञ् छन्दोऽग्ग्ँनिन् देवताꣳ शिरसि बिन्यस्स्यामि" इति जपेत्। ततः स्वाः ग्रीवाः (ग्रीवापृष्ठदेशं) स्पृष्ट्वा "ओ३म्, उष्णिहञ् छन्दः सवितारन् देवताङ् ग्रीवासु बिन्यस्स्यामि" इति जपेत्। ततः स्वं पृष्ठवंशं स्पृष्ट्वा "ओ३म्, अनूके बृहतीञ् छन्दो बृहस्प्पतिन् देवतांव् विन्यस्स्यामि" इति जपेत्। ततः स्वौ बाहू स्पृष्ट्वा "ओ३म्, बाह्व्बोर् बृहदद्रथन्तरे च्छन्दसी द्द्यावापृथिवी देवतांव् विन्यस्स्यामि" इति जपेत्। ततः स्वमुदरं स्पृष्ट्वा "ओ३म्, मद्ध्ये त्रिष्ट्टुभञ् छन्दऽइन्द्रन् देवतांव् विन्यस्स्यामि" इति जपेत्। ततः स्वे श्रोणी स्पृष्ट्वा "ओ३म्, श्रोण्ण्योर् ज्जगतीञ् छन्दऽआदित्यन् देवतांव् विन्यस्स्यामि" इति जपेत्। ततः स्वम् मेड्ढ्रं स्पृष्ट्वा "ओ३म्, मेड्ढ्रेऽतिच्छन्दसञ् छन्दः प्प्रजापतिन् देव-तांव् विन्यस्स्यामि" इति जपेत्। ततः स्वम् पायुं स्पृष्ट्वा "ओ३म्, पायौ यज्ज्ँायज्ज्ँीयञ् छन्दो वैश्श्वानरन् देवतांव् विन्यस्स्यामि" इति

pal Sanskrit University, Balmeeki Campus, Kathmar

Public Domain. Digitization by eGangotri.Fund

जपेत्। ततः स्वावूरू स्पृष्ट्वा "ओ३म्, ऊर्ब्बोरनुष्टुभञ् छन्दो विश्वान् देवान् देवतांव् विन्यस्स्यामि" इति जपेत्। ततः स्वे जानुनी स्पृष्ट्वा "ओ३म्, अष्ठ्वीवतोः पङ्क्तिञ् छन्दो मरुतो देवतांव् विन्यस्स्यामि" इति जपेत्। ततः स्वौ पादौ स्पृष्ट्वा "ओ३म्, पादयोर् द्विपदाञ् छन्दो विष्णुन् देवतांव् विन्यस्स्यामि" इति जपेत्। ततः स्वानि चक्षुश्श्रोत्रादीनि सर्वाणीन्द्रियाणि स्पृष्ट्वा "ओ३म्, प्राणेषु विच्छन्दसञ् छन्दो वायुन् देवतांव् विन्यस्स्यामि" इति जपेत्। ततः स्वानि न्यूनातिरिक्तानि अङ्गानि स्पृष्ट्वा "ओ३म्, न्यूनातिरिक्तेष्वङ्गेषु न्यूनाक्षरञ् छन्दोऽपो देवतांव् विन्यस्स्यामि" इति जपेत्। ततोऽप उपस्पृश्य "एवꣳ सर्व्वाङ्गेषु योजयित्त्वा वेदमयः सम्पद्यते, शापानुग्रहसमर्त्थो भवति ब्राह्मन् तेजश्च वर्द्धते, न कुतश्चिद्द् भयंव् विन्दतेऽ ऋङ्मयो यजुर्म्मयः साममयस् त्तेजोमयो ब्रह्म्ममयोऽमृतमयः सम्भूय ब्रह्म्मैवाऽभ्येति, तस्म्मादेतन् नाऽब्रह्म्मचारिणे नाऽतपस्विने नाऽसंव्वत्सरोषिताय नाऽप्रवक्त्रेऽनुब्रूयात्, अनेनाऽधीतेन चान्द्रायणाब्दफलमाप्पॅ्नोत्त्यनेन सम्म्यग्ग् ज्ञातेन ब्रह्म्मणः सायुज्यꣳ सलोकतामाप्पॅ्नोत्त्याप्पॅ्नोति" इति न्यासादिमाहात्म्यं च पठेत्।

ततः स्वाध्यायाध्ययनारम्भे प्रतिदिनम् "ओ३म्, तत्त्सवितुर्ब्बरिण्यम् भर्ग्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ तत्त्सवितुर्ब्बरिण्यम् भर्ग्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्॥ तत्त्सवितुर्ब्बरिण्यम् भर्ग्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्" इत्युच्चार्य इषेत्त्वोर्ज्जेत्त्वेत्यादिकं मन्त्रभागं प्रत्यहमध्यायमध्यायं वाऽनुवाकमनुवाकं वा कण्डिकाङ्कण्डिकामेव वाऽपि यथाशक्ति उपर्युपरि क्रमेणाऽधीयीत। तद्दिनाध्ययनविरामे च "ओ३म्, प्रतीकम् मे विचक्षणञ् जिह्व्वा मे मधु यद्वचः। कर्ण्णाब्भ्याम् भूरि शुश्रुवे मा त्त्वꣳ हार्षीः श्रुतम् मयि। ब्रह्मणः प्रवचनमसि ब्ब्रह्मणः प्रतिष्ठा-

Sanskrit University, Balmeeki Campus, Kathm

In Public Domain. Digitization by eGangotri.Funding

नमसि ब्रह्मकोशोऽसि सनिरसि शान्तिरस्स्यनिराकरणमसि ब्रह्मम्मकोशम् मे बिश। बाचा त्त्वा पिदधामि बाचा त्त्वा पिदधामि तिष्ठ प्रतिष्ठ। स्वरकरणकण्ठ्यौरसदन्त्यौष्ठ्यग्रहणधारणोच्चारणशक्तिर् म्मयि भवतु। आप्प्यायन्तु मेऽङ्गानि बाक्क् प्राणश्च्चक्षुः श्रोत्रंय् यशो बलम्। षन्न् मे श्रुतमधीतन् तन्न् मे मनसि तिष्ठतुतिष्ठतु ओश्म्" इति अनिराकरणमन्त्रं पठेत्। अनिराकरणमन्त्रपाठावसाने आचमनं कृत्वा दर्भानुत्तरतः क्षिपेत्।

{एवमुपर्युपरि क्रमेण प्रतिदिनमध्ययनेन मन्त्रभागे समाप्ते ब्राह्मणकल्पसूत्रादीनां च गुरुमुखोच्चारणाऽनूच्चारणरूपाध्ययनगृहीतानां तेनैव प्रकारेण प्रतिदिनमध्ययनं कुर्वीत। तेषु ग्रन्थेषु समाप्तेषु पुनः मन्त्रसंहिताध्ययनमारभेत।

अनधीतवेदस्तु मन्त्रसंहितादिस्थाने सावित्रगायत्रीं पुरुषसूक्तं रुद्रसूक्तं वा अधीयीत। तदनुसारमेव सङ्कल्पे पूर्वसङ्कल्पमुच्चार्य "इषेत्त्वोर्ज्जे त्त्वा, व्रतमुपैष्ष्यन्; अग्निमीडे पुरोहितम्, अग्न आयाहि वीतये, ये त्रिषप्ताः परियन्ति, अथातोऽधिकारः, अथातो गृह्यस्त्थालीपाकानाङ् कर्म्म, स्वरसँस्कारयोश् छन्दसि नियमः, वृद्धिरादैच्, गौः ग्मा ज्मा क्ष्मा (समाम्नायः समाम्नातः), (मयरसतजभनलगसम्मितम्) धी श्री स्त्रीम्, पञ्चसंवत्सरमयं युगाध्यक्षम्, अथातो धर्मजिज्ञासा, अथातो ब्रह्मजिज्ञासा इत्यादिकेषु वेदमन्त्रसंहिता-ब्राह्मण-श्रौतसूत्रगृह्यसूत्रश्रौतगृह्यपरिशिष्टरूपकल्प-शिक्षा-व्याकरण-निरुक्त-च्छन्दश्शास्त्र-ज्योतिष-धर्ममीमांसाशास्त्र-ब्रह्ममीमांसाशास्त्रग्रन्थेषु क्रमेणाध्ययनीयेष्वपि मम तेषामध्ययनस्याऽभावात् सावित्रगायत्र्यध्ययनेन (पुरुषसूक्ताध्ययनेन वा रुद्द्रसूक्ताध्ययनेन वा) देवपितृतृप्तये (अक्षय्यनाकलोकप्राप्तये) परमात्मप्रसादसिद्धये च छन्दःपुरुषन्यासपूर्वकं ब्रह्मयज्ञं ब्रह्मयज्ञसमङ्गतासिद्धये देवादितर्पणादिकं च करिष्ये" इति वदेत्।

गुरुमुखोच्चारणानूच्चारणरूपाध्ययनेनाऽगृहीतानां याज्ञवल्क्यस्मृति-पुराण-रामायण-महाभारतादीनां तु "इतिहास-पुराणाद्यैः षष्ठसप्तमकौ नयेत्" इति दक्षस्मृतिवचनानुसारं (२।६९), "बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च।

pal Sanskrit University, Balmeeki Campus, Kathmar

Public Domain. Digitization by eGangotri.Fund

नित्यं शास्त्राण्यवेक्षेत निगमाँश्चैव वैदिकान्" इति मनुस्मृतिवचनानुसारं च (४।१९) दिवसस्य षष्ठे सप्तमे च भागे यथाशक्त्यवेक्षणं कुर्यात्, न ब्रह्मयज्ञे तेषामध्ययनं कुर्यात्, ब्रह्मयज्ञे तेषामध्ययनस्य परम्पराया अभावस्य लौगाक्षि-स्मृति-शिवपुराण-देवीभागवतपुराणेभ्योऽप्यवगम्यमानत्वात्।}

ततो ब्रह्मयज्ञाङ्गं देवादितर्पणादिकं कुर्यात् तद् यथा—

"अथ ब्रह्मयज्ञान्ते देवादि-दिव्यमनुष्य-दिव्यपितृ-(यम-स्वपितृ)-तर्पणं ब्रह्माद्यर्चनादिकं च करिष्ये" इति चेतस्समाधानं कृत्वा उपवीत्येव प्राङ्मुख एव च पातितदक्षिणजानुः एकस्माद् आयत-मुखात् ताम्रपात्रात् पृष्ठसंलग्नवामकरयुतदक्षिणकरकृतेन अङ्गुष्ठ-निपीडितप्रागग्रकुशत्रयवता अञ्जलिना उदकं गृह्णन् अन्यस्मिन् आयत-मुखे ताम्रपात्रे उदकं पातयन् देवतीर्थेन उदकं पूर्वतः क्षिपन् कुशाग्र-पातितेनोदकेन ब्रह्मादीन् देवादींस् तर्पयेत्—

ओ३म्, ब्रह्म्मा तृप्यताम्; ओ३म्, बिष्णुस्तृप्यताम्; ओ३म्, रुद्द्रस्तृप्यताम्; (ततो दक्षिणहस्तेनाऽप उपस्पृशेत्, ततः), ओ३म्, प्रजापतिस्तृप्यताम्; ओ३म्, देवास्तृप्यन्ताम्; ओ३म्, छन्दाँसि तृप्यन्ताम्; ओ३म्, बेदास्तृप्यन्ताम्; ओ३म्, ऋषयस् तृप्यन्ताम्; ओ३म्, पुराणाचार्य्यास्तृप्यन्ताम्; ओ३म्, गन्धर्ब्बास् तृप्यन्ताम्; ओ३म्, इतराचार्य्यास्तृप्यन्ताम्; ओ३म्, संव्वत्त्सरः सावयवस्तृप्यताम्; ओ३म्, देब्ब्यस्तृप्यन्ताम्; ओ३म्, अप्सरसस् तृप्यन्ताम्; ओ३म्, देवानुगास्तृप्यन्ताम्; ओ३म्, नागास्तृप्यन्ताम्; ओ३म्, सागरास्तृप्यन्ताम्; ओ३म्, पर्ब्बतास्तृप्यन्ताम्; ओ३म्, सरितस्तृप्यन्ताम्; ओ३म्, मनुष्यास्तृप्यन्ताम्; ओ३म्, यक्षास् तृप्यन्ताम्; ओ३म्, रक्षाँसि तृप्यन्ताम्; ओ३म्, पिशाचास्तृप्यन्ताम्;

Sanskrit University, Balmeeki Campus, Kathm

In Public Domain. Digitization by eGangotri.Funding

(ततो दक्षिणहस्तेनाऽप उपस्पृशेत्, ततः) ओ३म्, सुपर्ण्यास्तृप्यन्ताम्; ओ३म्, भूतानि तृप्यन्ताम्; (ततो दक्षिणहस्तेनाऽप उपस्पृशेत्, ततः) ओ३म्, पशवस्तृप्यन्ताम्; ओ३म्, वनस्पतयस्तृप्यन्ताम्; ओ३म्, ओषधयस्तृप्यन्ताम्; ओ३म्, भूतग्रामश्चतुर्ब्विधस्तृप्यताम् इति।

तत उदङ्मुखो निवीती उपस्थं कृत्वा समजानुः अञ्जलौ मध्ये भुग्नान् कुशान् अङ्गुष्ठनिपीडितान् कृत्वा कायतीर्थेन उदकमुत्तरतः क्षिपन् कुशमध्यपातितेनोदकेन सनकादिदिव्यमनुष्याँस् तर्पयेत्—

ओ३म्, सनकस्तृप्यताम्; ओ३म्, सनन्दनस्तृप्यताम्; ओ३म्, सनातनस् तृप्यताम्; ओ३म्, कपिलस् तृप्यताम्; ओ३म्, आसुरिस्तृप्यताम्; ओ३म्, बोढुस्तृप्यताम्; ओ३म्, पञ्चशिखस् तृप्यताम्। इति।

ततो दक्षिणाभिमुखः प्राचीनावीती पातितवामजानुः अञ्जलौ मध्ये भुग्नान् कुशान् अङ्गुष्ठनिपीडितान् कृत्वा पितृतीर्थेन उदकं दक्षिणतः क्षिपन् कुशाग्रकुशमूलपातितेन तिलमिश्रोदकेन कव्यवाडनलादिदिव्यपितॄँस् तर्पयेत्—

ओ३म्, कव्यवाडनलस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः, ओ३म्, सोमस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः, ओ३म्, यमस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः, ओ३म्, अर्य्यमा तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः, ओ३म्, पितरोऽग्निष्वात्तास्तृप्यन्तामेतत् तेब्भ्य उदकं स्वधा नमः, ओ३म्, पितरो बर्हिषदस्तृप्यन्तामेतत् तेब्भ्य उदकं स्वधा नमः, ओ३म्, पितरः सोमपास्तृप्यन्तामेतत् तेब्भ्य उदकं स्वधा नमः। इति।

pal Sanskrit University, Balmeeki Campus, Kathmar

Public Domain. Digitization by eGangotri.Fund

(ततस्तथैव यावज्जीवकृतपापनाशकामश् चतुर्दश यमान् नमोन्तैर् नाममन्त्रैस् त्रिभिस्त्रिभिस् तिलमिश्रोदकाञ्जलिभिस् तर्पयेत्–

ओ३म्, यमाय नमः ३, ओ३म्, धर्म्मराजाय नमः ३, ओ३म्, मृत्यवे नमः ३, ओ३म्, अन्तकाय नमः ३, ओ३म्, वैवस्स्वताय नमः ३, ओ३म्, कालाय नमः ३, ओ३म्, सर्व्वभूतक्षयाय नमः ३, ओ३म्, औदुम्बराय नमः ३, ओ३म्, दद्ध्नाय नमः ३, ओ३म्, नीलाय नमः ३, ओ३म्, परमेष्ठिने नमः ३, ओ३म्, वृकोदराय नमः ३, ओ३म्, चित्राय नमः ३, ओ३म्, चित्रगुप्ताय नमः ३ इति)

ततस्तथैव स्वपितॄंस् तर्पयेत्–

ओ३म्, अस्मत्पिता अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः ३।

ओ३म्, अस्मत्पितामहः अमुकशर्म्मा अमुकगोत्रो रुद्रस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः ३।

ओ३म्, अस्मत्प्रपितामहः अमुकशर्म्मा अमुकगोत्र आदित्यस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः ३। इति।

तत उदीरतामित्यादिकान् नव मन्त्रान् तृप्यध्वमिति तु त्रिश् च पठन् पितृतीर्थेन निरन्तरं जलं पातयन् प्रसिञ्चेत्–

ओ३म्, उदीरतामवरऽउत्त् परासऽउन्न् मद्ध्यमाः पितरः सोम्यासः। असुंय् यऽईयुरवृकाऽऋतज्ज्ँआस्त् ते नोऽवन्तु पितरो हवेषु॥ अङ्गिरसो नः पितरो नवग्वाऽअथर्व्वाणो भृगवः सोम्यासः। तेषांव् वयꣳ सुमतौ यज्ज्ँञियानामपि भद्द्रे सौमनसे स्स्याम॥ आ यन्तु नः पितरः सोम्यासोऽग्ग्ँनिष्ष्वात्ताः पथिभिर्द् देवयानैः।

Sanskrit University, Balmeeki Campus, Kathm

In Public Domain. Digitization by eGangotri.Funding

अस्मिन् न्यज्ज्ँञे स्स्वधया मदन्तोऽधिब्ब्रुवन्तु तेऽवन्त्वस्म्मान्॥ ऊर्ज्जंव् वहन्तीरमृतङ् घृतम् पयः कीलालम् परिस्स्रुतम्। स्वधा स्थ तर्प्पयत मे पितॄन्॥ पितृब्भ्यः स्वधायिब्भ्यः स्वधा नमः पितामहेब्भ्यः स्वधायिब्भ्यः स्वधा नमः प्प्रपितामहेब्भ्यः स्वधायिब्भ्यः स्वधा नमः। अक्ष्णन्न् पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धद्ध्वम्॥ ये चेह पितरो ये च नेह याँश्च्च बिद्द्ँम याऽाँऽउ च न प्प्रविद्द्ँम। त्वंव् वेत्थ यति ते जातवेदः स्वधाभिर्ब्यज्ज्ँञ६ सुकृतञ् जुषस्व॥ मधु वाताऽऋतायते मधु क्षरन्ति सिन्धवः। माद्ध्वीर्न्नः सन्त्वोषधीः॥ मधु नक्क्तमुतोषसो मधुमत्त् पार्त्थिव६ रजः। मधु द्द्यौरस्तु नः पिता॥ मधुमान् नो बनस्प्पतिर् म्मधुमाऽाँऽअस्तु सूर्यः। माद्ध्वीर्ग्गावो भवन्तु नः॥ ओ३म्, तृप्प्यद्ध्वम्। तृप्प्यद्ध्वम्। तृप्प्यद्ध्वम्॥ इति।

ततो नमो व इत्यादीनि अष्टौ यजूंषि सकृद् ब्रूयात्—

ओ३म्, नमो वः पितरो रसाय। नमो वः पितरः शोषाय। नमो वः पितरो जीवाय। नमो वः पितरः स्वधायै। नमो वः पितरो घोराय। नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वः। गृहान् नः पितरो दत्त। सतो वः पितरो देष्म॥ इति।

ततो मातामहाँस् तर्पयेत्—

ओ३म्, अस्मन्मातामहः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्प्यतामेतत् तस्म्मा उदकं स्वधा नमः ३।

ओ३म्, अस्मत्प्रमातामहः अमुकशर्म्मा अमुकगोत्रो रुद्रस्स्वरूपस्तृप्प्यतामेतत् तस्म्मा उदकं स्वधा नमः ३।

pal Sanskrit University, Balmeeki Campus, Kathmar

Public Domain. Digitization by eGangotri.Fund

ओ३म्, अस्मद्वृद्धप्रमातामहः अमुकशर्म्मा अमुकगोत्र आदित्यस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः ३। इति।

ततो यस्य येऽन्येऽपि तर्पणीयाः सन्ति तानपि क्रमेण तर्पयेत्-

ओ३म्, अस्म्मदाचार्यः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः।

ओ३म्, अस्म्मद्विद्यागुरुः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः।

ओ३म्, अस्म्मच्छिष्यः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः।

ओ३म्, अस्म्मदृत्विग् अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः।

ओ३म्, अस्म्मत्पत्नी अमुकी देवी अमुकगोत्रा वसुस्स्वरूपा तृप्यतामेतत् तस्स्या उदकं स्वधा नमः।

ओ३म्, अस्म्मत्पुत्रः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः।

ओ३म्, अस्म्मत्पुत्री अमुकी देवी अमुकगोत्रा वसुस्स्वरूपा तृप्यतामेतत् तस्स्या उदकं स्वधा नमः।

ओ३म्, अस्म्मज्(त्)ज्येष्ठ(कनिष्ठ-)ब्भ्राता अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः।

ओ३म्, अस्म्मत्सापत्तृँनज्येष्ठ-(कनिष्ठ-)ब्भ्राता अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः।

Sanskrit University, Balmeeki Campus, Kathm

In Public Domain. Digitization by eGangotri.Funding

ओ३म्, अस्मज्(त्)ज्येष्ठ-(कनिष्ठ-)पितृव्यः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

ओ३म्, अस्मत्सापत्तृँनज्येष्ठ-(कनिष्ठ-)पितृव्यः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत्तस्मा उदकं स्वधा नमः।

ओ३म्, अस्मच्छ्वशुरः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

ओ३म्, अस्मत्सखः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

ओ३म्, अस्मज्(त्)ज्येष्ठ(कनिष्ठ)मातुलः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

ओ३म्, अस्मत्सापत्तृँनज्येष्ठ(कनिष्ठ)मातुलः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

ओ३म्, अस्मद्भागिनेयः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्मा उदकं स्वधा नमः।

ओ३म्, अस्मज्(त्)ज्येष्ठ(कनिष्ठ)स्स्वसा अमुकी देवी अमुकगोत्रा वसुस्स्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः।

ओ३म्, अस्मत्सापत्तृँनज्येष्ठ(कनिष्ठ)स्वसा अमुकी देवी अमुकगोत्रा वसुस्स्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः।

ओ३म्, अस्मज्(त्)ज्येष्ठ(कनिष्ठ)पितृष्वसा अमुकी देवी अमुकगोत्रा वसुस्स्वरूपा तृप्यतामेतत् तस्या उदकं स्वधा नमः।

pal Sanskrit University, Balmeeki Campus, Kathmar

Public Domain. Digitization by eGangotri.Fund

ओ३म्, अस्मत्सापत्तॄंनज्येष्ठ(कनिष्ठ)पितृष्वसा अमुकी देवी अमुकगोत्रा वसुस्स्वरूपा तृप्यतामेतत् तस्स्या उदकं स्वधा नमः।

ओ३म्, अस्मज्(त्)ज्येष्ठ(कनिष्ठ)मातृष्वसा अमुकी देवी अमुकगोत्रा वसुस्स्वरूपा तृप्यतामेतत् तस्स्या उदकं स्वधा नमः।

ओ३म्, अस्मत्सापत्तॄंनज्येष्ठ(कनिष्ठ)मातृष्वसा अमुकी देवी अमुकगोत्रा वसुस्स्वरूपा तृप्यतामेतत् तस्स्या उदकं स्वधा नमः।

ओ३म्, अस्मदाप्तः अमुकशर्म्मा अमुकगोत्रो वसुस्स्वरूपस्तृप्यतामेतत् तस्म्मा उदकं स्वधा नमः। इति।

ततो वासो निष्पीडयेत्।

ततः प्राङ्मुख उपवीती आचम्य पुटाञ्जलिं कुर्वाणस् तल्लिङ्गैर् मन्त्रैर् ब्रह्मादीन् अर्चयेत् (स्तुवीत)—

ओ३म्, ब्रह्म्म जज्ञ्ँानम् प्रथमम् पुरस्ताद् द्वि सीमतः सुरुचो वेनऽ आवः। स बुद्ध्न्याऽउपमाऽअस्स्य विष्ठाः सतश्च्च योनिमसतश्च्च वि वः॥

ओ३म्, इदंव् विष्णुर्व्विचक्रमे त्रेधा निदधे पदम्। समूढमस्स्य पाँसुरे॥

ओ३म्, नमस्ते रुद्द्र मन्न्यवऽउतो तऽइषवे नमः। बाहुब्भ्यामुत ते नमः॥ (ततो दक्षिणहस्तेनाऽप उपस्पृशेत्, ततः)।

ओ३म्, तत् त्सवितुर्व्वरिण्यम् भर्ग्गो देवस्स्य धीमहि। धियो यो नः प्रचोदयात्॥

Sanskrit University, Balmeeki Campus, Kathm

In Public Domain. Digitization by eGangotri.Funding

ओ३म्, मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि। द्युम्नञ् चित्रश्रवस्तमम्॥

ओ३म्, इमम् मे बरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके॥ इति।

तत उत्तिष्ठन् सूर्यमुपतिष्ठेत– ओ३म्, अदृश्रमस्य केतवो विरश्म्मयो जनाऽ२ँऽअनु। भ्राजन्तोऽ अग्ग्ँनयो यथा। हꣳसः शुचिषद् वसुरन्तरिक्षसद् धोता वेदिषदतिथिर्दुरोणसत्। नृषद् वरसदृतसद्द् व्योमसदब्ब्जा गोजाऽऋतजाऽ अद्रिजाऽऋतम् बृहत्॥ इति।

ततः सूर्यं प्रदक्षिणीकृत्य उत्तिष्ठन्नेव तांतां दिशं प्रत्यावर्तमानो दिशो दिग्देवताश्च नमस्कुर्वीत–

ओ३म्, प्राच्च्यै दिशे नमः। ओ३म्, आदित्याय नमः। (ओ३म्, आग्नेय्यै दिशे नमः। ओ३म्, अग्नये नमः।)

ओ३म्, दक्षिणायै दिशे नमः। ओ३म्, यमाय नमः। (ओ३म्, नैर्ऋत्यै दिशे नमः। ओ३म्, निर्ऋतये नमः।) ओ३म्, विष्णुः।

ओ३म्, प्रतीच्च्यै दिशे नमः। ओ३म्, वरुणाय नमः। (ओ३म्, वायव्यायै दिशे नमः। ओ३म्, वायवे नमः।)

ओ३म्, उदीच्च्यै दिशे नमः। ओ३म्, सोमाय नमः। (ओ३म्, ऐशान्यै दिशे नमः। ओ३म्, ईशानाय नमः। ओ३म्, विष्णुः।)

ओ३म्, ऊर्ध्वायै दिशे नमः। ओ३म्, अग्नये नमः। ओ३म्, अवाच्च्यै दिशे नमः। ओ३म्, अनन्ताय नमः। इति।

pal Sanskrit University, Balmeeki Campus, Kathmar

Public Domain. Digitization by eGangotri.Fund

ततः प्राङ्मुख उपविश्य ब्रह्मादीन् नमस्कुर्वीत—

ओ३म्, ब्रह्म्मणे नमः। ओ३म्, अग्ग्ँनये नमः। ओ३म्, पृथिब्ब्यै नमः। ओ३म्, ओषधिब्भ्यो नमः। ओ३म्, बाचे नमः। ओ३म्, बाचस्प्पतये नमः। ओ३म्, बिष्णवे महते नमः। ओ३म्, अद्द्भ्यो नमः। ओ३म्, अपाम्पतये नमः। ओ३म्, बरुणाय नमः। इति।

ततः संव्वर्चसेति मुखं विमृज्यात्—

ओ३म्, संव् वर्च्चसा पयसा सन् तनूभिरगन्महि मनसा सꣳ शिवेन। त्वष्टा सुदत्त्रो विदधातु रायोऽनु मार्ष्ट्टु तन्व्वो यद् द्विलिष्टम्॥ इति।

ततो देवागातुविद इति विसर्जयेत्—

ओ३म्, देवा गातुविदो गातुंव् वित्त्वा गातुमित। मनसस्प्पतऽ इमन् देव यज्ज्ँञꣳ स्वाहा वाते धाः॥ इति।

इति श्रीगुरुमुखोच्चारणानूच्चारणरूपाद्ध्ययन-समवाप्त-स्वशाखा-मन्त्र-ब्राह्मण-कल्पसूत्रेण श्रुतिस्मृतिपुराण-पारायणपरायणेनाऽवलोकित-नानाधर्मशास्त्रनिबन्धेन गण्डकी-प्रदेशाभिजनेन कौण्डिन्यायनेनाऽऽचार्येण शिवराजशर्मणा द्विजोत्तमेन कृता माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेद-शाखाध्यायिनां द्विजानाङ् कात्यायन-त्रिकण्डिक-स्नानसूत्राद्यनुसारिणी ब्रह्मयज्ञपद्धतिः समाप्ता।

LSanskrit University, Balmeeki Campus, Kathm

In Public Domain. Digitization by eGangotri Funding

वैदिक-कालज्ञानम्

तिथिश्च करणम् भञ्च योगोऽथो वासराधिपः। दिनरूपस्य कालस्य पञ्चाङ्गानि विदुर् बुधाः॥१॥
सूर्योदयात् प्रभृति यो यावत् सूर्योदयम् परम्। कालस् तत् सावनदिनं वैदिकैः परिकीर्तितम्॥२॥
त्रिंशन्मुहूर्तोऽहोरात्रः पक्षस् ते दश पञ्च च। पक्षौ पूर्वापरौ शुक्लकृष्णौ मासस् तु तावुभौ॥३॥
प्रतिपच् च द्वितीया च तृतीया च चतुर्थ्यपि। पञ्चमी चैव षष्ठी च सप्तमी चाष्टमी ततः॥४॥
नवमी दशमी चैकादशी च द्वादशी तथा। त्रयोदशी चाऽथ चतुर्दश्यथो पौर्णमास्यमे॥५॥
करणानि तु कौस्तुभ-वव-वालव-कौलवाः। तैतिलश् च गरश् चाऽपि वणिग् विष्टिर् ववादयः॥६॥
क्रमाच् शुक्लप्रतिपदस् तिथ्यर्धेषु भवन्ति हि। कृष्णपक्षान्ते शकुनिश् चतुष्पान् नाग एव च॥७॥
नक्षत्राणि कृत्तिका च रोहिणी मृगशीर्षकम्। आर्द्रा पुनर्वसू पुष्यस् ततोऽश्लेषा मघास् तथा॥८॥
पूर्वफल्गुन्यौ च फल्गुन्यौ तथैवोत्तरे अपि। हस्तश् चित्रा च स्वातिश् च विशाखे चाऽनुराधिकाः॥९॥
ज्येष्ठा मूलञ् च पूर्वाश् चाऽषाढास् ता उत्तरा अपि। श्रवणश् च श्रविष्ठाश् च ततश् शतभिषक् परः॥
पूर्वभद्रपदे चैवोत्तरभद्रपदे अपि। रेवत्यश्चयुजौ चाऽपभरण्यश् चाऽप्यनुक्रमात्॥११॥
यत्राऽहोरात्रके यस्य नक्षत्रस्य तु सन्धौ। भवेच् चन्द्रस् तस्य तद्धि नक्षत्रमिति कथ्यते॥१२॥
"अग्निः प्रजापतिः सोमो रुद्रोऽदितिर् बृहस्पतिः। सर्पाश्च पितरश् चैव भगश् चैवाऽर्यमाऽपि च॥१३॥
सविता त्वष्टाऽथ वायुश् चेन्द्राग्नी मित्र एव च। इन्द्रो निर्ऋतिरापो वै विश्वेदेवास् तथैव च॥१४॥
विष्णुर् वसवो वरुणोऽजएकपात् तथैव च। अहिर्बुध्न्यस् तथा पूषा अश्विनौ यम एव च॥१५॥
नक्षत्रदेवता एता एताभिर् यज्ञकर्मणि। यजमानस्य शास्त्रज्ञैर् नाम नक्षत्रजं स्मृतम्॥१६॥"
सूर्यचन्द्रस्थितिवशाद् योगा विष्कम्भकादयः। भवन्ति तेषान् नाम्नैव विज्ञेयञ् च शुभाशुभम्॥१७॥

१ २ ३ ४ ५ ६ ७ ८ ९ १०
विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस् तथा। अतिगण्डः सुकर्मा च धृतिः शूलश् च गण्डकः॥
११ १२ १३ १४ १५ १६ १७ १८ १९ २०
वृद्धिर् ध्रुवश्च व्याघातो हर्षणो वज्र एव च। सिद्धिस् तथा व्यतीपातो वरीयान् परिघश् शिवः॥१९॥
२१ २२ २३ २४ २५ २६ २७
सिद्धिस् साध्यश् शुभश् शुक्लो ब्रह्मा ऐन्द्रश्च वैधृतिः। इति योगास्तु सङ्कल्पे कीर्तनीया बुधैस् स्मृताः।
आदित्यश्चाऽथ सोमश्च मङ्गलश्च बुधोऽपि च। बृहस्पतिश् शुक्र-शनी स्युः क्रमाद् वासराधिपाः॥२१॥
तपस्-तपस्यौ च मधु-माधवौ शुक्रकः शुचिः। नभो-नभस्यौ चेषोर्जौ सहाश् चैव सहस्यकः॥२२॥
सूर्यगत्यनुगौ चान्द्रौ वैदिकद्विजसम्मतौ। द्वौद्वौ तपःप्रभृतिकौ मासावृतुरिहोदितः॥२३॥
शिशिरश् च वसन्तश् च ग्रीष्मो वर्षास् तथा शरत्। हेमन्तश् चेति ऋतवः क्रमान् मासद्वयात्मकाः॥
उत्तरायणमत्रोक्तमृतुभिश् शिशिरादिभिः। त्रिभिर् वर्षादिभिः प्रोक्तमृतुभिर् दक्षिणायनम्॥२५॥
आर्यावर्ते तु मध्याह्नेऽहस्सु दीर्घतमा यदा। शङ्कोश् छाया ततस् सूर्यः प्राप्नुयादुत्तरायणम्॥२६॥
आर्यावर्ते हि मध्याह्नेऽहस्सु ह्रस्वतमा यदा। शङ्कोश् छाया ततः सूर्यः प्राप्नुयाद् दक्षिणायनम्॥२७॥
सूर्यस्योदङ्मुखीभावात् स्फुटं याऽमावसी परा। तस्यां तु पूर्णे मासे हि प्रवृत्तं वर्षमिष्यते॥२८॥
तस्य मासस्य या शुक्लप्रतिपत् तत एव च। इज्याथं वर्षमयनमृतुर् मासश् च गण्यते॥२९॥
एकस्मिन्नयने सप्त दर्शा वर्षे त्रयोदश। यदा दर्शे सप्तमे तु पूर्णो मासस् तदाऽधिकः॥३०॥
द्वाभ्यां हि अयनाभ्यां स्याद् वर्षं सर्वत्सरादिकम्। सर्वत्सरस् तु प्रथमो द्वितीयः परिवत्सरः॥३१॥
ततश्चेदावत्सरश्च तुर्य इदवत्सरः श्रुतः। वत्सरः पञ्चमोऽब्दः स्यात् पञ्चाब्दन् तु युगं स्मृतम्॥३२॥
वैष्णवम् प्रथमन् तत्र बार्हस्पत्यन् ततः परम्। ऐन्द्रमाग्नेयञ् च त्वाष्टमाहिर्बुध्यञ्च पित्र्यकम्॥३३॥
वैश्वदेवञ्च सौम्यञ् च ऐन्द्राग्नाऽश्विनन् तथा। भाग्यञ् चेति द्वादशैव युगानि कथितानि हि॥३४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

Public Domain. Digitization by eGangotri.Fundi

"स्वराक्रमेते सोमार्कौ यदा साकं सवासवौ। स्यात् तदाऽऽदियुगम् माघस् तपश्शुक्लोऽयनं ह्युदक्॥"
चान्द्राहिप्रभवाद्यास्तु तपश्शुक्लादिका मताः। एते ह्यन्यैः क्वचिच् चैत्र-शुक्लाद्याः परिकीर्तिताः॥

"प्रभवो विभवः शुक्लः प्रमोदश्च प्रजापतिः। अङ्गिराः श्रीमुखो भावो युवा धाता तथैव च॥३७॥
ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः। चित्रभानुः स्वभानुश्च तारणो वारिदो व्ययः॥३८॥
सर्वजित् सर्वधारी च विरोधी विकृतः खरः। नन्दनो विजयश्चैव जयः कामश्च दुर्मुखः॥३९॥
हेममाली विलम्बी च विकारी शर्वरी प्लवः। शोककृच् छुभकृत् क्रोधी विश्वावसु-परावसू॥४०॥
प्लवङ्गः कीलकः सौम्यः सोमो रोधकृदेव च। धावनो मथनो वीरो राक्षसश्चाऽनलोऽपि च॥४१॥
पिङ्गलः काल-सिद्धार्थौ रौद्रो वै दुर्मतिस् तथा। दुन्दुभिश्चाङ्गारकश्च रक्तः क्रोधस्तथा क्षयः॥४२॥"
चैत्रशुक्लप्रतिपदि कलेरब्दः प्रवर्तते। अन्येषां तु मते यावतिथः षट्त्रिंशता ततः॥४३॥
न्यूनः कृष्णयुगाब्दस् तु वैदिकानां प्रवर्तते। तपश्शुक्लप्रतिपदि तत्पूर्वस्यामिति स्थितिः॥४४॥
तष्टः कलियुगाब्दास्तु षष्ट्याऽऽदियुगसङ्ख्यः। लब्धः, शेषे पञ्चभिस् तु तष्टे लब्धं युगाद्द् गतम्॥४५॥
शिष्टेऽत्र खे पञ्चमोऽब्दोऽन्यत्र तत्सङ्ख्यवत्सरः। सर्वंवत्सरादियुञ्जेयो वैदिकैर् ब्राह्मणैस् सदा॥४६॥

सङ्कल्परचनाप्रकारनिदर्शनम्

"ओ३म्। तत् सत्। स्वस्ति। श्रीमद्भगवतो महापुरुषस्य अचिन्त्यापरिमितमायाशक्तिकस्य लीलामयेच्छया सृष्टानां पञ्चाशत्-कोटियोजनविस्तारकाणामव्यक्तमहदहङ्काराऽऽकाशवायु-तेजोपृथ्वीरूपावरणाऽऽवृत-चतुर्दशभुवनात्मकानामनन्तकोटि-सङ्ख्याकानां ब्रह्माण्डानामेकतमस्मिन्नेतस्मिन् ब्रह्माण्डे भूर्लोके भूमण्डले जम्बूद्वीपे भारतवर्षे कर्मभूमौ कुमारिकाखण्डे आर्यावर्तान्तर्गते हिमवत्खण्डे गण्डकीप्रदेशे ——— ग्रामे (नगरे) इह पुण्यदेशे वेदोक्तजगत्सृष्टिकारिणो नारायणनाभि-कमलोद्भवस्यैतस्य वर्तमानस्य ब्रह्मणो द्वितीये परार्धे प्रथमे वर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे ब्रह्मतिथ्यात्मकेषु मत्स्य-पुराणाद्युक्तेषु श्वेतवाराहादिषु त्रिंशति कल्पेषु प्रथमे श्वेतवाराहकल्पे स्वायम्भुवादिषु चतुर्दशसु मन्वन्तरेषु सप्तमे वैवस्वतमन्वन्तरे एकसप्ततौ सप्तन्यांशासु चतुर्युगीषु अष्टाविंशतितम्यां चतुर्युग्याम्, तत्र च सत्य-त्रेताद्वापरेषु व्यतीतेषु कलौ युगे प्रवृत्ते तस्य च प्रथमे चरणे पञ्चसु सहस्रेषु [illegible]यष्टौ च वर्षेषु व्यतीतेषु तदुत्तरे वर्षे प्रवृत्ते (वेदोक्तपञ्चवर्षात्मकयुगानुसारिणां चान्द्राणां प्रभवादीनां षष्टेः संवत्सराणां पञ्चवर्षात्मकेषु [illegible]ष्वेषु पञ्चसु वर्षेषु विजयापरनामके परिवत्सराख्ये द्वितीये वर्षे) उदगयने शिशिरे ऋतौ तपसि (माघे) मासे शुक्ले पक्षे प्रतिपदि तिथौ (कौत्सुभे करणे) मूले नक्षत्रे (विष्कम्भादिषु सप्तविंशतौ योगेषु दशमे गण्डके योगे) शनैश्चरवासरे श्रीसूर्ये वृश्चिकराशौ (सायने धनूराशौ) स्थिते चन्द्रमसि धनूराशौ स्थिते देवगुरौ मिथुनराशौ स्थिते शेषेषु ग्रहेषु यथायथं राशिषु स्थितेषु सत्सु एवङ्गुणविशेषेण विशिष्टे शुभे पुण्ये काले अहं ——— शर्मा ——— गोत्रः ——— प्रवरो माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदशाखाध्यायी कात्यायनश्रौतसूत्र-पारस्करगृह्यसूत्र-कात्यायनत्रिकण्डिकस्नानसूत्राद्यनुसारी अहम् नित्यब्रह्मयज्ञे इषेत्वोर्ज्जे त्वा, व्रतमुपैष्यन्, अग्निमीडे पुरोहितम्, अग्न आयाहि वीतये, ये त्रिषप्ताः परियन्ति, अथातोऽधिकारः, अथातो गृह्यस्थाली-पाकानाङ् कर्म्म; स्वरसँस्कारयोश् च्छन्दसि नियमः, वृद्धिरादैच्, गौः ग्माज्मा क्ष्मा (समाम्नायः समाम्नातः), (मयरसतजभनलगसम्मितम्) धी श्री स्त्रीम्, पञ्चसंवत्सरमयं युगाध्यक्षम्, अथातो धर्मजिज्ञासा, अथातो ब्रह्मजिज्ञासा इत्यादिकेषु वेदमन्त्रसहिता-ब्राह्मण-श्रौतसूत्र-गृह्यसूत्रश्रौतगृह्यपरिशिष्टरूपकल्प-प्रातिशाख्य-शिक्षा-व्याकरण-निरुक्त-च्छन्दश्शास्त्र-ज्योतिष-धर्ममीमांसाशास्त्र-ब्रह्ममीमांसाशास्त्रग्रन्थेषु क्रमेणाध्ययनीयेषु यथाध्ययनं यथाशक्ति स्वशाखावेदमन्त्रसंहितादिग्रन्थानां क्रमेणाध्ययनेन देवपितृ-तृप्तये (अक्षय्यनाकलोकप्राप्तये) परमात्मप्रसादसिद्धये च छन्दःपुरुषन्यासपूर्वकं ब्रह्मयज्ञं ब्रह्मयज्ञसमङ्गतासिद्धये देवादितर्पणादिकं च करिष्ये।"

Sanskrit University, Balmeeki Campus, Kathm

In Public Domain. Digitization by eGangotri

दक्॥"
ताः॥
३७॥
॥
॥
४०॥
॥४१॥
॥४२॥"
॥
॥४५॥
॥४६॥

वितकस्य
पृथिवी-
नेतस्मिन्
वत्खण्डे
वस्यैतस्य
तु मत्स्य-
मन्वन्तरेषु
च सत्य-
व्यतीतेषु
ववर्षात्म-
दवत्सर-
स (माघे)
षु दशमे
ते देवगुरौ
पुण्ये काले
श्रौतसूत्र-
मुपैष्यन्;
वस्त्थाली-
माम्नातः),
ा, अथातो
तिशाख्य-
णाध्ययनी-
क्षय्यनाक-
ादितर्पणा-

pal Sanskrit University, Balmeeki Campus, Kathma

n Public Domain. Digitization by eGangotri

अस्माकम् प्रकाशिता ग्रन्थाः

(संस्कृते)

१.कतिपय-नैपाल-संस्कृतग्रन्थकार-परिचयः (२०४८) ४०/-
२.भारतवर्षबहिर्गमनादि-दुरित-प्रायश्चित्तव्यवस्था (विस्तृतनैपालीयभाषाभूमिकायुता, २०४९) ४०/-
३.कौण्डिन्न्यायनशिक्क्षा (पुष्कलसर्वाङ्गोपूर्वो विपुलकायो वेदाङ्गशिक्षाग्रन्थः, २०४९) [illegible]
४.वेदभाषानिघण्टुः (देववर्ग-ब्रह्मवर्गात्मकः, २०५०)
५.सदाचारकर्म-संस्कारकर्म-श्राद्धकर्मादि-वैदिक-मन्त्र-सङ्ग्रहः (२०५२)
६.सन्ध्योपासनपद्धतिः (नैपालीयभाषानिबद्धविस्तृतभूमिकायुता, २०५६)
७.एकोद्दिष्टश्राद्धपद्धतिः (नैपालीयभाषानिबद्धविस्तृतभूमिकायुता, २०५८)
८.व्यावहारिकं संस्कृतम् (प्रथमम् पुस्तकम्, २०५०)
९.व्यावहारिकं संस्कृतम् (द्वितीयम् पुस्तकम्, २०५३)
१०.व्यावहारिकं संस्कृतम् (तृतीयम् पुस्तकम्, २०५८)
११.काव्यप्रकाशः (हैमवत्या संस्कृतव्याख्यया सहितः, मोतीलालबनारसीदासप्रकाशितः, सन् १९८०) भा.रू. १२०/-
१२.पाणिनीयशिक्षा (वेदाङ्गशिक्षादिमर्शाख्यव्याख्यासहिता, वाराणसीस्थचौखम्बाविद्याभवनप्रकाशिता, सन् १९९८) भा.रू. ४०/-

(नैपालीयभाषायाम्)

१.वृत्तनक्षत्रमाला (छन्दोग्रन्थ, २०२८) १/-
२.जिम्दो नेपालि भासा (पैलो खण्ड, २०३०) ३।१०
३.जिम्दो नेपालि भासा (दोस्रो खण्ड, २०३७) १०/-
४.नेपाली वर्णोच्चारणशिक्षा (साझा प्रकाशन, २०३१) ११।२५
५.वैदिक धर्म मूल रूपमा (२०४५) १००/-
६.संवैधानिक हिन्दुराज्यको चरित्र र आवश्यकता के कस्तो? (२०४७) २/-
७.नेपालमा लोकतन्त्र दरो र दिगो कसरि होला? (२०४७) २/-
८.वैदिक-समाजवादि-लोकतान्त्रिक-संस्कारप्रवर्धनसभाको आह्वान तथा उद्देश्य सिद्धान्त र कार्यक्रम (२०४७) १/-
९.वैदिक-सनातन-वर्णाश्रम-धर्म (हिन्दुधर्म) र एसका उपज अरु उपधर्महरु तथा स्वधर्मरक्षाका लागि वर्णाश्रमधर्माऽनुयायिहरुको कर्तव्य (२०४७) १/-
१०.संस्कृतवाङ्मयको महत्त्व, नेपालमा संस्कृतवाङ्मयको संरक्षण-संवर्धनको प्रयास, संस्कृत-शिक्षाको वर्तमान शोचनीय अवस्था तथा तेस अवस्थाको निराकरणको मार्ग (२०४८) २/-
११.संस्कृतशिक्षालाइ सर्वजनोपयोगि साधारणशिक्षाका रूपमा समेत विकसित गरि सरल, सन्तुलित, वैज्ञानिक, सर्वतोमुख र लोकोपयोगि तथा लोकग्राह्य बनाएर दिन लिन आह्वान (२०५०) (निश्शुल्क)
१२.तनहुँ-चुँदि-रम्घा-बिसिको भानुसंस्कृतमाध्यमिकविद्यालयको स्वर्णजयन्तीको रहस्य (२०५५) (निश्शुल्क)
१३.संस्कृत-संस्कृति-सामान्यज्ञान-प्रश्नोत्तरसङ्ग्रह (२०५५) १०/-
१४.स्वाद्ध्यायशालाकुटुम्बको स्वधर्मसन्देश (१) वैदिकसनातनवर्णाश्रमधर्मका मूल सिद्धान्तसूत्रहरु (२०५६) (निश्शुल्क)
१५.स्वाद्ध्यायशालाकुटुम्बको स्वधर्मसन्देश (२) वैदिक-मन्त्र-सङ्ग्रहका सात मन्त्रहरुका विषयमा प्रचारित भ्रमको निराकरण (२०५६) १०/-
१६.स्वाद्ध्यायशालाकुटुम्बको स्वधर्मसन्देश (३) शास्त्र-धर्म-चेतना जगाऔं, स्वशाखासूत्रोक्त सन्ध्योपासन गरेर मात्र अरु धर्मकर्म गर्ने गरौं (निश्शुल्क)
१७. स्वाद्ध्यायशालाकुटुम्बको स्वधर्मसन्देश (४) वैदिक मूल कालगणनापद्धति बुजेर धार्मिक कृत्य गर्न उद्बोधन ५/-

bal Sanskrit University, Balmeeki Campus, Kathma